च

च, चकारः । स तु व्यञ्जनषष्ठवर्णः । (द्वितीयवर्गस्याद्यवर्णश्च ।) अस्योच्चारणस्थानं तालु । इति व्याकरणम् ॥ (यदुक्तं सिद्धान्तकौमुद्याम् । "इचुयशानां तालु ।" इति । तथा च शिक्षायाम् । "कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू ॥")
वङ्गाक्षरेरस्य स्वरूपं यथा, कामधेनुतन्त्रे ।
"चवर्णं शृणु सुश्रोणि ! चतुर्वर्गप्रदायकम् ।
कुण्डलीसहितं देवि ! स्वयं परमकुण्डली ॥
सततं कुण्डलीयुक्तं पञ्चदेवमयं सदा ।
पञ्चप्राणमयं वर्णं पञ्चप्राणात्मकं सदा ॥
त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं प्रिये ! ॥"
अपि च ।
"वार्त्ताकुवर्त्तुलाकार ऊर्द्ध्वाधः क्रमतो गतः ।
रेखाचयेषु चन्द्राग्निसूर्य्यास्तिष्ठन्ति निश्चयः ।
शक्तिर्मात्रा तु विज्ञेया ध्यानमस्य प्रवक्ष्यते ॥"
तस्य ध्यानं यथा, वर्णोद्धारतन्त्रे
"तुषारकुन्दपुष्पाभां नानालङ्कारभूषिताम् ।
सदा षोडशवर्षीयां वराभयकरां पराम् ॥
शुक्लवस्त्रावृतकटिं शुक्लवस्त्रोत्तरीयिणीम् ।
वरदां शोभनां रम्यामष्टबाहुसमन्विताम् ॥
एवं ध्यात्वा चकारन्तु तन्मन्त्रं दशधा जपेत् ॥"
तस्य नामानि यथा, नानातन्त्रेषु ।
"चः पुष्करी हली वाणी चालशक्तिः सुदर्शनः ।
चर्म्मसुण्डधरो भूत्वा महिषाचारसम्भिनी ॥
एकरूपो रविः कूर्म्मचामुण्डा दीर्घबाहुकः
वामबाहुर्म्मूलमाया चतुर्म्मूर्त्तिस्वरूपिणी ॥
दयितश्च द्विनेत्रश्च लक्ष्मीश्चितयलोचनः ।
चन्द्रनं चन्द्रमा देवचेतनो रश्मिको बुधः ॥
देवी केटसुखेश्वात्मा कौमारी पूर्व्वफाल्गुनी ।
अनङ्गमेखला वायुर्म्मेदिनी च कलावती ॥"
(मातृकान्यासे वामबाहुमूले एवास्य न्यस्तता ॥)

च, व्य (चयति चिनोतीति वा । चय शब्दे चिञ् चितौ वा + "अन्येष्वपि दृश्यते ।" ३ । २ । १०१ । इति डः ।) अन्वाचयः । यत्र एकस्य प्राधान्येनापरस्य गौणत्वेनाख्यानं सोऽन्वाचयः । यथा । भो वटो ! भिक्षामट गाञ्चानय । भिक्षाटनमत्र प्रधानं तत् कुर्व्वाणो यदि गां पश्यसि तदा तामप्यानयेति नो चेत् भिक्षामेवाटेति । समाहारस्तिरोहितावयवभेदः इतरेतर उद्रिक्तावयवभेदः । अतएव चार्थे द्वन्द्व इति सूत्रं विधाय चार्थोऽत्र समाहार इतरेतरश्चेति व्याख्याय समाहारे अनभिव्यक्तावयवत्वात् एकवचनम् । इतरेतरयोगे संहन्यमानप्राधान्यात् द्विबहुवचनम् । यथा । "माणिमार्द्दं अश्ववलीवर्द्दं ब्राह्मणक्षत्रियविट्शूद्राः । प्लक्षन्यग्रोधाविति परैरुक्तम् । समुच्चितिः समुच्चयः प्राधान्येन क्वचित् क्रियाविषयेऽनेकस्य चीयमानता । यथा । धवञ्च खदिरञ्च छिन्धि । इति भरतः ॥ समाहारः । [illegible]र्थः । समुच्चयः । (यथा, मनुः । १२ । ८८ ।
"इह चामुत्र वा काम्यं प्रवृत्तं कर्म्म कीर्त्त्यते ॥")
पक्षान्तरम् । (यथा, हितोपदेशे ।
"मूर्खोऽपि शोभते तावत् सभायां वस्त्रवेष्टितः ।
तावच्च शोभते मूर्खो यावत् किञ्चिन्न भाषते ॥"
तथा च शकुन्तलायां १ मे अङ्के ।
"शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य ।
अथवा भवितव्यानां द्वाराणि भवन्ति सर्व्वत्र ॥")
पादपूरणम् । (यथा, रामायणे । १ । २० । १६ ।
"तेन संचोदितौ तौ तु राक्षसौ च महाबलौ ।
मारीचश्च सुबाहुश्च यज्ञविघ्नं करिष्यतः ॥")
अवधारणम् । इति मेदिनी । चे । १२ ॥ हेतुः । इति त्रिकाण्डशेषः ॥

चः, पुं, (चयति शब्दायते इति । चय शब्दे + "अन्येष्वपि दृश्यते ।" ३ । २ । १०१ । इति डः ।) चण्डेशः । (चिनोति स्वाङ्गानि सङ्कोचयतीति । चि + डः ।) कच्छपः । (चीयते उपचीयते क्रमशः कलाभिः प्रतिपदादिमारभ्येत्यर्थः ।) चन्द्रः । (चिनोति सञ्चिनोति परधनानि इति ।) चौरः । इति मेदिनी ॥ चे । १ ॥ निर्ब्बीजे दुर्जने च त्रि । इति शब्दरत्नावली ॥

चक, इ भ्रान्तौ । सौत्रो धातुरयम् । इति कविकल्पद्रुमः ॥ (भ्वा-परं-अकं-सेट् ।) इ, चङ्कुरः रथे । इति दुर्गादासः ॥

चक, ञ ङ म प्रतिघाते । तृप्तौ । इति कविकल्पद्रुमः ॥) भ्वा-उभं-आत्म-सकं-अकं-सेट् ।) ञ, चकति चकते खलः साधुम् । ङ, चकते जनस्तृप्यतीत्यर्थः । म, चकयति । इति दुर्गादासः ॥

चकास, ऋ च सु दीप्तौ । इति कविकल्पद्रुमः ॥ (अदा-परं-अकं-सेट् ।) ऋ, अचीचकासत् अचचकासत् । अनेकाक्षरात् सन्वद्भावविकल्पः । च, चकासति । सु, चकास्ति । इति दुर्गादासः ॥

चकितं, त्रि, (चक भ्रान्तौ + क्तः ।) भीतम् । इति त्रिकाण्डशेषः ॥ (यथा, कलाविलासे । २ । ८ ।
"दत्त्वा दिशि दिशि दृष्टिं याचकचकितोऽवगुण्ठनं कृत्वा ।
चौर इव कुटिलचारी पलायते विकटरथ्याभिः ॥
क्ली, भावे क्तः । भयम् । नायिकालङ्कारविशेषः । तल्लक्षणं यदुक्तं साहित्यदर्पणे । ३ । १२१ ।
"कुतोऽपि दयितस्याग्रे चकितं भयसम्भ्रमः ॥")
"प्रियाग्रे चकितं भीतेरस्थानेऽपि भयं महत् ।"
इत्युज्ज्वलनीलमणिः ॥
(स्त्री, छन्दोविशेषः । यथा, छन्दोमञ्जर्य्याम् ।
"भात् सनतनगैरष्टच्छेदे स्यादिह चकिता ॥")

चकोरः, पुं स्त्री, (चकते चन्द्रकिरणेन तृप्यतीति । चक तृप्तौ + "कठिचकिभ्यामोरन् ।" उणा । १ । ६४ । इति ओरन् ।) पक्षिविशेषः । (यथा, भागवते । ३ । २१ । ४३ ।
"सारसैश्चक्रवाकैश्च चकोरैर्वल्गुकूजितम् ॥")
तत्पर्य्यायः । चन्द्रिकापायी २ कौमुदीजीवनः ३ अस्य मांसगुणाः । यथा, राजनिर्घण्टे ।
"चटकं शीतलं रुच्यं वृष्यं कापिञ्जलामिषम् ।
तद्वच्चकोरजं मांसं वृष्यञ्च बलपुष्टिदम् ॥"
("वातश्लेष्माधिको ज्ञेयः शीतलः शुक्रवर्द्धनः ।
अश्मरीं हन्ति विशदो बलकृन्मांसलस्तथा ॥
चकोरः शुकशारी च समदोषा गुणागुणैः ॥"
इति हारीते प्रथमस्थाने एकादशेऽध्याये ॥
अस्य डिम्बगुणा यथा, चरके सूत्रस्थाने २७ अः ।
"धार्त्तराष्ट्रचकोराणां दक्षाणां शिखिनामपि ।
चटकानाञ्च यानि स्युरण्डानि च हितानि च ॥
रेतःक्षीणेषु कासेषु हृद्रोगेषु क्षतेषु च ।
मधुराण्यविपाकीनि सद्यो बलकराणि च ॥").

चकोरकः, पुं स्त्री, (चकोर एव । चकोर + स्वार्थे कन् ।) चकोरपक्षी । इत्यमरः । २ । ५ । ३५ ॥

चक्क, क अर्त्तौ । इति कविकल्पद्रुमः ॥ (चुरा-परं-सकं-सेट् ।) कोपधः । आद्यस्वरमध्यः । अर्त्तिः पीडनम् । क, चक्कयति शत्रुं शूरः । इति दुर्गादासः ॥

चक्रं, क्ली, (क्रियतेऽनेनेति । कृ + घञर्थे कः । कृञादीनामिति द्वित्वम् ।) व्रजः । समूहः । सैन्यम् । रथाङ्गम् । चाका इति भाषा ॥ (यथा, याज्ञवल्क्ये । १ । ३५१ ।
"यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत् ।
तथा पुरुषकारेण विना दैवं न सिध्यति ॥")
राष्ट्रम् । दम्भविशेषः । कुम्भकारोपकरणम् । कुमारेर चाक इति भाषा ॥ (यथा, याज्ञवल्क्ये । ३ । १४६ ।
"मृद्दण्डचक्रसंयोगात् कुम्भकारो यथा घटम् ।
करोति तृणमृत्काष्ठैर्गृहं वा गृहकारकः ॥")
अस्त्रविशेषः । (यथा, रघुः । ७ । ४६ ।
"आधोरणानां गजसन्निपाते
शिरांसि चक्रैर्निशितैः क्षुराग्रैः ॥")
जलावर्त्तः । इति मेदिनी ॥ भगवतः सुदर्शनचक्रम् । (यथा, महाभारते । १ । १९ । ६ ।
"ततो भगवता तस्य शिरश्छिन्नमलङ्कृतम् ।
चक्रायुधेन चक्रेण पिबतोऽमृतमोजसा ॥")
तस्य भगवन्मन्दिरे स्थापनविधिर्यथा, श्रीभागवते । ३ । १ । २३ ।
"अन्यानि चेह द्विजदेवदेवैः
कृतानि नानायतनानि विष्णोः ।
प्रत्यङ्गमुख्याङ्कितमन्दिराणि
यद्दर्शनात् कृष्णमनुस्मरन्ति ॥"
"द्विजदेवैः ऋषिभिर्देवैश्च कृतानि अङ्गमङ्गं प्रति वर्त्तन्ते इति प्रत्यङ्गान्यायुधानि तेषु मुख्यं चक्रं तेनाङ्कितानि मूर्द्धन्यहेमकुम्भेषु चिह्नितानि मन्दिराणि येषु तानि नानाविधानि विष्णोरायतनानि क्षेत्राणि तीर्थानि च आसिषेवे । येषां चक्राङ्कितमन्दिराणां दर्शनात् श्रीकृष्णस्मरणं भवति ।" इति तट्टीकायां श्रीधरस्वामी ॥ *
अथ चक्रलक्षणम् ।
"द्वादशारन्तु षट्कोणं वलयत्रयसंयुतम् ।
चक्रं स्याद्दक्षिणावर्त्तः शङ्खश्च श्रीहरेः स्मृतः ॥"
इति श्रीहरिभक्तिविलासे ४ विलासः ॥